# श्री सुब्रह्मण्य भुजंगप्रयात स्तोत्रं

भजेऽहं कुमारं भवानी कुमारं
गलोल्लासिहारं नमत्सद्विहारम् ।
रिपुस्तोम पारं नृसिंहावतारं
सदानिर्विकारं गुहं निर्विचारम् ॥ 1

नमामीशपुत्रं जपाशोण गात्रं
सुराराति शत्रुं रवींद्वग्निनेत्रम् ।
महाबर्हिपत्रं शिवास्याब्जमित्रं
प्रभास्वत्कलत्रं पुराणं पवित्रम् ॥ 2

अनेकार्ककोटि प्रभावज्वलन्तं
मनोहारि माणिक्य भूषोज्वलन्तम् ।
श्रितानामभीष्टं निशांतं नितान्तं
भजे षण्मुखं तं शरच्चन्द्रकान्तम् ॥ 3

कृपावारि कल्लोलभास्वत्कटाक्षं
विराजन्मनोहारि शोणांबुजाक्षम् ।
प्रयोग प्रदान प्रवाहैक दक्षं
भजे कान्ति कांतं परस्तोम रक्षम् ॥ 4

© 2022 Vedam Nadam 

सुकस्तूरि सिंदूर भास्वल्ललाटं
दया पूर्ण चित्तं महादेवपुत्रम् ।
रवीन्दूल्लसद्रत्न राजत्किरीटं
भजे क्रीडिताकाश गंगाद्रिकूटम् ॥ 5

सुकुन्द प्रसूनावली शोभितांगं
शरत्पूर्णचन्द्र प्रभाकांतिकान्तम् ।
शिरीषप्रसूनाभिरामं भवन्तं
भजे देवसेनापतिं वल्लभं तम् ॥ 6

सुलावण्य सत्सूर्य कोटि प्रतीकं
प्रभुं तारकारिं द्विषड्बाहुमीशम् ।
निजार्क प्रभादीप्यमानाखिलाशं
भजे पार्वतीप्राणपुत्रं सुकेशम् ॥ 7

अजं सर्वलोकप्रियं लोकनाथं
गुहं शूरपद्मादिदंभोलिधारम् ।
सुचारुं सुनासापुटं सच्चरित्रं
भजे कार्तिकेयं सदा बाहुलेयम् ॥ 8

शरारण्य संभूतमिन्द्रादिवन्द्यं
द्विषड्बाहु संख्यायुधश्रेणि रम्यम् ।
मरुत्सारथिं कुक्कुटेशं सुकेतुं
भजे योगिहृत्पद्ममध्याधिवासम् ॥ 9

© 2022 Vedam Nadam

विरिंचीन्द्रवल्लीश देवेशमुख्यं
प्रशस्तामर स्तोम संस्तूयमानम् ।
दिश त्वं दयालो श्रियं निश्चलां मे
विना त्वां गतिः का प्रभो मे प्रसीद ॥ 10

पदांभोजसेवा समायातबृन्दा-
रकश्रेणि कोटीर भास्वल्ललाटम् ।
कलत्रोल्लसत्पार्श्व युग्मं वरेण्यं
भजे देवमाध्यंत हीनप्रभावम् ॥ 11

भवांभोधि मध्ये तरंगे पतंन्तं
प्रभो मां सदा पूर्णदृष्ट्या समीक्ष्य ।
भवद्भक्तिनावोद्धर त्वं दयालो
सुगत्यन्तरं नास्ति देव प्रसीद ॥ 12

गलॆ रत्नभूषं तनौ मंजुवेषं
करे ज्ञानशक्तिं दरस्मेरमास्ये ।
कटिन्यस्तपाणिं शिखिस्थं कुमारं
भजेऽहं गुहादन्यदैवं न मन्ये ॥ 13

दयाहीन चित्तं परद्रोहवृत्तिं
सदा पापशीलं गुरोर्भक्तिहीनम् ।
अनन्यावलम्बं भवन्नेत्रपात्रं
कृपाशील मां भो पवित्रं कुरु त्वम् ॥ 14

महासेन गांगेय वल्लीसहाय
प्रभो तारकारे षडास्यामरेश ।
सदा पायसान्न प्रियस्त्वं गुहेति
स्मरिष्यामि भक्त्या कदाहं विभो त्वाम् ॥ 15

प्रतापस्य बाहो नमद्वीरबाहो
प्रभो कार्तिकेयेष्टकामप्रदेति ।
यदा ये भजंते भवन्तं तदैव
प्रसन्नं सुतोषं श्रियं त्वं ददासि ॥ 16

अपारेऽति दारिद्र्य वाराशि मध्ये
भ्रमन्तं जनग्राह पूर्णे नितान्तम् ।
महासेन मामुद्धर त्वं कटाक्षा-
वलोकेन किञ्चित्प्रसीद प्रसीद ॥ 17

स्थिरां देहि भक्तिं भवत्पादपद्मे
श्रियं निश्चलां देहि मह्यं कुमार ।
गृहं चन्द्रतारं सुवंशाभिवृद्धिं
कुरु त्वं प्रभो मे मनः कल्पसाल ॥ 18

नमस्ते नमस्ते महाशक्तिपाणे
नमस्ते नमस्ते लसद्वज्रपाणे ।
नमस्ते नमस्ते कटिन्यस्तपाणे
नमस्ते नमस्ते सदाभीष्टपाणे ॥ 19

© 2022 Vedam Nadam

नमस्ते नमस्ते महाशक्तिधारिन्
नमस्ते सुराणां महासौख्यदायिन् ।
नमस्ते सदा कुक्कुटेशोऽग्नि केता-
स्समस्तापराधं विभो मे क्षमस्व ॥ 20

कुमारात्परं कर्मयोगे न जाने
कुमारात्परं कर्मशीलं न जाने ।
य एको मुनीनां हृदब्जाधिवासः
शिवांकं समारुह्य सत्पीठकल्पम् ॥ 21

विरिंचाय मन्त्रोपदेशं चकार
प्रमोदेन सोऽयं तनोतु श्रियं मे ।
यमाहुः परं वेद शूरेषु मुख्यं
सदा यस्य शक्त्या जगद्भीति दूरम् ॥ 22

यमाश्रित्य देवाः स्थिरं स्वर्गपालाः
सदोंकाररूपं चिदानन्दमीडे ।
गुहस्तोत्रमेतत् कृतं तारकारेः
भुजंगप्रयातेन हृद्येन कान्तम् ॥ 23

जना ये पठन्ते महभक्ति युक्ताः
प्रमोदेन सायं प्रभाते विशेषः ।
नजन्मर्क्ष योगे यदा ते पठंते
मनोवांछितान् सर्वकामान् लभन्ते ॥ 24

॥ इति श्रीसुब्रह्मण्यभुजंगप्रयातस्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam